# तैत्तिरीयारण्यके

## षष्ठः प्रश्नः

तैत्तिरीयारण्यके

षष्ठः प्रश्नः

Date

Page No.

# तैत्तिरीयारण्यके षष्ठः प्रश्नः

ओम्- संत्वा सिञ्चामि यजुषा प्रजामायुर्धनंच। ओं शान्ति
श्शान्तिश्शान्तिः।

ओम्- परेयुवागं्सं प्रवतो महीरनु बहुभ्यः पन्थामनपस्प
शानम्। वैवस्वतगं् संगमनं जनानां यमगं् राजानगं् हविषा
दुवस्यत। इदंत्वा वस्त्रं प्रथमंन्वागन्नपैतदूह यदिहाबिभः
पुरा। इष्टापूर्तमनु संपश्य दक्षिणां यथा ते दत्तं बहुधा विबन्धुषु।
इमौ युनज्मि ते वह्नी असुनीथाय वोढवे। याभ्यां यमस्य साद
नगं् सुकृतां चापि गच्छतात्। पूषा त्वेतश्च्यावयतु प्रविद्वाननष्ट
पशुर्भुवनस्य गोपाः। स त्वैतेभ्यः परिददात्पितृभ्योऽग्निर्देवेभ्य
स्सुविदत्रेभ्यः। पूषेमा आशा अनुवेद सर्वास्सो अस्मागं् अभय
तमेन नेषत्। स्वस्तिदा अघृणिस्सर्ववीरोऽप्रयुच्छन्पुर एतु
प्रविद्वान्। (1) आयुर्विश्वायुः परिपासति त्वा पूषा त्वा पातु
प्रपथे पुरस्तात्। यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः
सविता दधातु। भुवनस्य पत इदगं् हविः। अग्नये रयिमते स्वाहा।
पुरुषस्य सयावर्यपेदघानि मृज्महे। यथा नो अत्र नापरः पुरा
जरस आयति। पुरुषस्य सयावरि वि ते प्राणमसिस्रसम्।

धनुर्हस्तादाददानो मृतस्य श्रियै क्षत्रायौजसे बलाय।
अत्रैव त्वमिह वयग्ं सुशेवा विश्वास्पृधो अभिमातीर्जयेम।

शरीरेण महीमि हि स्वधयेह पितृनुप प्रजयास्मानिहा
वह। मैवं मागंस्ताप्रियेह देवी सती पितृलोकं यदैषि। विश्व
वारा नभसा संव्ययन्त्युभौ नो लोकौ पयसाभ्यावृत्स्व। (२)
इयं नारी पतिलोकं वृणाना निपद्यत उपत्वा मर्त्य प्रेतम्।
विश्वं पुराणमनु पालयन्ती तस्यै प्रजां द्रविणं चेह धेहि।
उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुपशेष एहि। हस्त
ग्राभस्य दिधिषोस्त्वमेतत्पत्युर्जनित्वमभि सं बभूथ। सुव
र्णं हस्तादाददाना मृतस्य श्रियै ब्रह्मणे तेजसे बलाय।
अत्रैव त्वमिह वयं सुशेवा विश्वाः स्पृधो अभिमातीर्जयेम।
मणिं हस्तादाददाना मृतस्य श्रियै विशे पुष्ट्यै बलाय।
अत्रैव त्वमिह वयं सुशेवा विश्वाः स्पृधो अभिमातीर्जयेम। (3)
इममग्ने चमसं मा विजिह्वरः प्रियो देवानामुत सोम्यानाम्।
एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ताम्।
अग्नेर्वर्म परि गोभिर्व्ययस्व संप्रोर्णुष्व मेदसा पीवसा च।
नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधृग्विधक्ष्यन्पर्यङ्खयाते।
मैनमग्ने विदहो माभिशोचो मास्य त्वचं चिक्षिपो मा शरीरम्।

Date

Page No.

यदा शृतं करवो जातवेदोऽथेमेनं प्रहिणुतात्पितृभ्यः। शृतं यदा
करसि जातवेदोऽथेमेनं परिदत्तात्पितृभ्यः। यदा गच्छात्यनुनीति
मेतामथा देवानां वशनीर्भवाति। सूर्यं ते चक्षुर्गच्छतु वातमात्मा
द्यां च गच्छ पृथिवीं च धर्मणा। अपो वा गच्छ यदि तत्र ते हित
मोषधीषु प्रतितिष्ठा शरीरैः। अजो भागस्तपसा तं तपस्व तं
ते शोचिस्तपतु तं ते अर्चिः। यास्ते शिवास्तनुवो जातवेदस्ताभि
र्वहेमग्ं सुकृतां यत्र लोकाः। अयं वै त्वमस्मादधि त्वमेतदयं
वै तदस्य योनिरसि। वैश्वानरः पुत्रः पित्रे लोककृज्जातवेदो
वहेमग्ं सुकृतां यत्र लोकाः। (4) 1

य ऽतस्य पथो गोप्तारस्तेभ्यस्स्वाहा य ऽतस्य पथो रक्षितार
स्तेभ्यस्स्वाहा य ऽतस्य पथोभिरक्षितारस्तेभ्यस्स्वाहाऽऽख्यात्रे
स्वाहाऽपाख्यात्रे स्वाहाऽभिलालपते स्वाहाऽपलालपते स्वाहाऽग्नये
कर्मकृते स्वाहा यमत्र नाधीमस्तस्मै स्वाहा। यस्त इध्मं जभरत्सिष्वि
दानो मूर्धानं वा ततपते त्वाया। दिवो विश्वस्मात्सीमघायत उरुष्यः। अस्मा
त्त्वमधि जातोसि त्वदयं जायतां पुनः। अग्नये वैश्वानराय सुवर्गाय
लोकाय स्वाहा। (5) 2

Date

Page No.

प्रकेतुना बृहता भात्यग्निराविर्विश्वानि वृषभो रोरवीति । दिव
श्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्ध । इदं त एकं
पर ऊत एकं तृतीयेन ज्योतिषा संविशस्व । संवेशनस्तनुवै चारु
रेधि प्रियो देवानां परमे सधस्थे । नाके सुपर्णमुप यत्पतन्तगं
हृदा वेनन्तो अभ्यचक्षत त्वा । हिरण्यपक्षं वरुणस्य दूतं यमस्य
योनौ शकुनं भुरण्युम् । अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ
साधुना पथा । अथा पितॄन्त्सुविदत्रागं अपीहि यमेन ये सधमादं
मदन्ति । यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसा ।
ताभ्यागं राजन्परिदेह्येनगं स्वस्ति चास्मा अनमीवं च धेहि । (6)
उरूणसावसुतृपावुलुम्बलौ यमस्य दूतौ चरतो वशागं अनु । तावस्म
भ्यं दृशये सूर्याय पुनर्दत्तावसुमद्येह भद्रम् । सोम एकेभ्यः पवते
घृतमेक उपासते । येभ्यो मधु प्रधावति तागंश्चिदेवापि गच्छतात् ।
ये युध्यन्ते प्रधनेषु शूरासो ये तनुत्यजः । ये वा सहस्रदक्षिणा
स्तागंश्चिदेवापि गच्छतात् । तपसा ये अनाधृष्यास्तपसा ये सुव
र्गताः । तपो ये चक्रिरे महस्तागंश्चिदेवापि गच्छतात् । अश्मन्वती
रेवतीस्सगं रभध्वमुत्तिष्ठत प्रतरता सखायः । अत्रा जहाम

Date Page No.

ये असन्नशेवाश्शिवान्वयमभिवाजानुत्तरेम। (7) यद्वै देवस्य
सवितुः पवित्रꣳ सहस्रधारं विततमन्तरिक्षे। येनापुनादिन्द्र
मनार्तमात्यै तेनाहं माꣳ सर्वतनुं पुनामि। याराष्ट्रात्पन्नादप
यन्ति शाखा अभिमृता नृपतिमिच्छमानाः। धातुस्तास्सर्वाः
पवनेन पूताः प्रजयाऽस्मान्रय्या वर्चसा सꣳसृजाथ। उद्वयं
तमसस्परि पश्यन्तो ज्योतिरुत्तरम्। देवं देवत्रा सूर्यमगन्म
ज्योतिरुत्तमम्। धाता पुनातु सविता पुनातु। अग्नेस्तेजसा
सूर्यस्य वर्चसा। (8) 3

यं ते अग्निममन्थाम वृषभायेव पक्तवे। इमं तꣳ शमयामसि
क्षीरेण चोदकेन च। यं त्वमग्ने समदहस्त्वमु निर्वापया पुनः।
कयाम्बूरत्र जायतां पाकदूर्वा व्यल्कशा। शीतिके शीतिकावति ह्लादुके
ह्लादुकावति। मण्डूक्याऽसु संगमय इमꣳ स्वग्निꣳ शमय। शं ते
धन्वन्या आपश्शमु ते सन्त्वनूक्याः। शं ते समुद्रिया आपश्शमु
ते सन्तु वर्ष्याः। शं ते स्रवन्तीस्तनुवे शमु ते सन्तु कूप्याः। शं ते नीहारो
वर्षतु शमु पृष्वावशीयताम्। (9) अवसृज पुनरग्ने पितृभ्यो

Date

Page No.

यस्त आहूतश्चरति स्वधाभिः। आयुर्वसान उपयातु शेषगं
संगच्छतां तनुवा जातवेदः। संगच्छस्व पितृभि स्सगं स्वधाभि
स्समिष्टापूर्तेन परमे०योमन्। यत्र भूम्यै वृणसे तत्र गच्छ
तत्र त्वा देवस्सविता दधातु। यत्ते कृष्णश्शकुन आतुतोद
पिपील स्सर्प उत वाश्वापदः। अग्निष्टद्विश्वादनृणं कृणोतु
सोमश्च यो ब्राह्मण माविवेश। उत्तिष्ठात स्तनुवगं संभरस्व
मेह गात्रमवहा मा शरीरम्। यत्र भूम्यै वृणसे तत्र गच्छ तत्र
त्वा देव स्सविता दधातु। इदं त एकं पर ऊत एकं तृतीयेन ज्योति
षा संविशस्व। संवेशन स्तनुवैचारु रेधि प्रियो देवानां परमे सध
स्थे। उत्तिष्ठ प्रेहि प्रद्रवौकः कृणुष्व परमे०योमन्। यमेन त्वं यम्या
संविदानोत्तमं नाकमधि रोहेमम्। अश्मन्वती रेवती र्यद्दे देवस्य सवितुः
पवित्रं या शष्ट्रात्पन्ना दुद्वयं तमस स्परि धाता पुनातु। अस्मात्त्वमधि
जातो स्यय त्वदधि जायताम्। अग्नये वैश्वानराय सुवर्गाय लोकाय
स्वाहा। (10) 4

Date Page No.

आयातु देवस्सुमनाभिरूतिभिर्यमो ह वेह प्रयताभिरक्ता । आ
सीदताग्ं सुप्रयते ह बर्हिष्यूर्जाय जात्यै मम शत्रुहत्यै । यमे इव
यतमाने यदैतं प्र वा भरन्मानुषा देवयन्तः । आसीदतग्ं स्वमु
लोकं विदाने स्वासस्थे भवतमिन्दवे नः । यमाय सोमग्ं सुनुत
यमाय जुहुता हविः । यमग्ं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ।
यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत । स नो देवेष्वा यमद्दीर्घ
मायुः प्रजीवसे । यमाय मधुमत्तमग्ं राज्ञे हव्यं जुहोतन । इदं
नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः । (11) योस्य
कौष्ठ्य जगतः पार्थिवस्यैक इद्वशी । यमं भङ्ग्यश्रवो गाय यो
राजानपरोध्यः । यमं गाय भङ्ग्यश्रवो यो राजानपरोध्यः । येनापो
नद्यो धन्वानि येन द्यौः पृथिवी दृढा । हिरण्यकक्ष्यान्त्सुधुरान् हिर
ण्याक्षानयश्शफान् । अश्वाननश्शतो दानं यमो राजाभितिष्ठति ।
यमो दाधार पृथिवीं यमो विश्वमिदं जगत् । यमाय सर्वमित्तस्थे य
त्प्राणद्वायुरक्षितम् । यथा पंच यथा षड्यथा पंच दशर्षयः । यमं यो
विद्यात्स ब्रूयाद्यथैक ऋषिर्विजानते (12) त्रिकद्रुकेभिः पतति षडुर्वी
रेकमिद्बृहत् । गायत्री त्रिष्टुप्छन्दाग्ंसि सर्वा ता यम आहिता ।

Date

Page No.

अहरहर्नयमानो गामश्वं पुरुषं जगत्। वैवस्वतो न तृप्यति
पंचभिर्मानवैर्यमः। वैवस्वते विविच्यन्ते यमे राजनि ते जनाः
येचेह सत्येनेच्छन्ते य उचानृतवादिनः। ते राजन्निह विवि
च्यन्तेऽथा यन्ति त्वामुप। देवागंश्च ये नमस्यन्ति ब्राह्मणागं
श्चापचित्यति। यस्मिन्वृक्षे सुपलाशे देवैस्संपिबते यमः।
अत्रा नो विश्पतिः पिता पुराणा अनुवेनति। (13) 5

वैश्वानरे हविरिदं जुहोमि साहस्रमुत्सगं शतधारमेतम्। तस्मि
न्नेष पितरं पितामहं प्रपितामहं बिभर्तिपिन्वमाने। द्रप्सश्चस्क
न्द पृथिवीमनुद्यामिमं च योनिमनु यश्च पूर्वः। तृतीयं योनि
मनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः। इमगं समुद्रगं
शतधारमुत्सं व्यच्यमानं भुवनस्य मध्ये। घृतं दुहानामदितिं
जनायाग्ने माहिगंसीः परमे व्योमन्। अपेतवीत विचसर्प
तातो येत्रस्थ पुराणा ये च नूतनाः। अहोभिरद्भिरक्तुभिर्व्यक्तं
यमो ददात्ववसानमस्मै। सवितैतानि शरीराणि पृथिव्यै मातु
रुपस्थ आदधे। तेभिर्युज्यन्तामघ्नियाः। (14) शुनं वाहा

Date Page No.

शुनं नाशः शुनं कृषन्तु लाङ्गलम्। शुनं वरत्रा बध्यन्ताग्ं शुन
मष्ट्रा मुदिङ्गय शुनासीरा शुनमस्मासु धत्तम्। शुनासीरा
विमां वाचं यद्दिवि चक्रथुः पयः। तेनेमामुप सिञ्चतम्।
सीते वन्दामहे त्वार्वाची सुभगे भव। यथा नः सुभगासति
यथा नः सुफलासति। सवितैतानि शरीराणि पृथिव्यै मातु
रूपस्थ आदधे। तेभिरदिते शं भव। विमुच्यध्वमघ्निया
देवयाना अतारिष्म तमसस्पारमस्य। ज्योतिरापाम
सुवरगन्म। (15) प्रवाता वान्ति पतयन्ति विद्युत उदोषधी
र्जिहते पिन्वते सुवः। इरा विश्वस्मै भुवनाय जायते यत्पर्ज
न्यः पृथिवीग्ं रेतसावति। यथा यमाय हार्म्यमवपन्पञ्च
मानवाः। तावं वपामि हार्म्यं यथासाम जीवलोके भूरयः।
चितस्स्थ परिचित ऊर्ध्वचितश्श्रयध्वं पितरो देवता।
प्रजापतिर्वस्सादयतु तया देवतया। आप्यायस्व सं ते। (16)

Date Page No.

उत्ते तभ्नोमि पृथिवी त्वत्परी मं लोकं निदधन्मो अहगं
रिषम्। एतागं स्थूणां पितरो धारयन्तु तेत्रा यमस्साद
ना त्ते मिनोतु। उपसर्प मातरं भूमि मेता मुरुव्य
चसं पृथिवीगं सुशेवाम्। ऊर्णम्रदा युवति र्दक्षिणावत्येषा
त्वा पातु निरृत्या उपस्थे। उच्छ्वञ्चस्व पृथिवि
मा विबाधिथास्सूपायनास्मै भव सूपवञ्चना। माता पुत्रं
यथा सिचा भ्येनं भूमि वृणु। उच्छ्वञ्चमाना पृथिवी हि
तिष्ठसि सहस्रं मित उप हि श्रयन्ताम्। ते गृहासो मधु
श्चुतो विश्वाहास्मै शरणास्सन्त्वत्र। राणी धाना हरिणी
रर्जुनीस्सन्तु धेनवः। तिलवत्सा ऊर्जमस्मै दुहाना
विश्वाहा सन्त्वनपस्फुरन्तीः। (17) एषा ते यम सादने स्वधा
निधीयते गृहे। अक्षितिर्नाम ते असौ। इदं पितृभ्यः प्रभरेम बर्हि
र्देवेभ्यो जीवन्त उत्तरं भरेम। तत्त्वमारोहासो मेध्यो भवं यमेन
त्वं यम्या संविदानः। मा त्वा वृक्षौ संबाधिष्टां मा माता पृथिवि
त्वम्। पितॄन् ह्यत्र गच्छास्येधासं यमराज्ये। मा त्वा वृक्षौ संबा
धेथां मा माता पृथिवी मही। वैवस्वतगं हि गच्छासि यमराज्ये

Date

Page No.

विराजसि। नक्रं प्लव मारोहैतं नक्रेन पथोन्विहि।
सत्वं नक्रप्लवो भूत्वा संतर प्रतरोत्तर।(18) सवितैतानि
शरीराणि पृथिव्यै मातुरूपस्य आदधे। तेभ्यः पृथिवि
शं भव। षड्ढौता सूर्यं ते चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ
पृथिवीं च धर्मणा। अपो वा गच्छ यदि तत्र ते हितमोषधीषु
प्रतितिष्ठा शरीरैः। परं मृत्यो अनुपरेहि पन्थां यस्ते स्व
इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां
रीरिषो मोत वीरान्। शं वात श्शं हि ते घृणि श्शमु ते स
न्त्वोषधीः। कल्पन्तां मे दिशश्शग्माः। पृथिव्यास्त्वा लोके
सादयाम्यमुष्य शर्मासि पितरो देवता। प्रजापतिस्त्वा साद
यतु तया देवतया। अन्तरिक्षस्यत्वा दिवस्त्वा दिशां त्वा
नाकस्यत्वा पृष्ठे ब्रध्नस्य त्वा विष्टपे सादयाम्यमुष्य
शर्मासि पितरो देवता। प्रजापतिस्त्वा सादयतु तया
देवतया। (19)

Date

Page No.

अपूपवान्घृतवाꣳश्चरुरेह सीदतूत्तभ्नुवन्पृथिवीं द्यामुतो
परि। योनिकृतः पथिकृतः सपर्यत ये देवानां घृतभागा इहस्थ।
एषा ते यम सादने स्वधा निधीयते गृहे सौ। दशाक्षरा ताꣳ
रक्षस्व तां गोपायस्व तां ते परिददामि तस्यां त्वा मा दभन्पि
तरो देवता। प्रजापतिस्त्वा सादयतु तया देवतया। अपूपवा
न्घृतवान्क्षीरवान्दधिवान्मधुमाꣳश्चरुरेह सीदतूत्तभ्नुव
न्पृथिवीं द्यामुतो परि। योनिकृतः पथिकृतस्सपर्यत ये देवा
नाꣳ घृतभागाः क्षीरभागा दधिभागा मधुभागा इहस्थ।
एषा ते यमसादने स्वधा निधीयते गृहे सौ। शताक्षरा सहस्रा
क्षराऽयुताक्षराच्युताक्षरा ताꣳ रक्षस्व तां गोपायस्व तां ते
परिददामि तस्यां त्वा मा दभन्पितरो देवता। प्रजापतिस्त्वा
सादयतु तया देवतया। (२०) ४

एतास्ते स्वधा अमृताः करोमि यास्ते धानाः परिकिराम्यत्र।
तास्ते यमः पितृभिस्संविदानोत्र धेनूः कामदुघाः करोतु।
त्वामर्जुनौषधीनां पयो ब्राह्मण इद्धिदुः। तासां त्वा मध्याद्दादे चरुभ्यो

Date

Page No.

अपि धातवे। दूर्वाणाꣳ स्तम्बमाहरैतां प्रियतमां मम।
इमां दिशं मनुष्याणां भूयिष्ठानुविरोहतु। काशानाꣳ
स्तम्बमाहर रक्षसामपहत्यै। यतस्यै दिशः पराभव
न्नघायवो यथा तेनाभवान्पुनः। दर्भाणाꣳ स्तम्बमाहर
पितृणामोषधीं प्रियाम्। अन्वस्यै मूलं जीवादनु काण्ड
मथो फलम्। (21) लोकं पृण ता अस्य सूददोहसः। शं वात
श्शꣳ हि ते घृणिश्श मु ते सन्त्वोषधीः। कल्पन्तां ते दिशस्सर्वाः।
इदमेव मे तोऽपरामार्तिं माशाम काँचन। तथा तदश्विभ्यां कृतं
मित्रेण वरुणेन च। वरणो वारयादिदं देवो वनस्पतिः। आर्त्यै
निर्ऋत्यै द्वेषाच्च वनस्पतिः। विधृतिरसि विधारयास्मदघा
द्वेषाꣳसि शमि शमयास्मदघाद्वेषाꣳसि यव यवयास्मदघाद्वेषाꣳ
सि। पृथिवीं गच्छान्तरिक्षं गच्छ दिवं गच्छ दिशो गच्छ सुवर्गच्छ
सुवर्गच्छ दिशो गच्छ दिवं गच्छान्तरिक्षं गच्छ पृथिवीं गच्छापो
वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः। अश्मन्व
ती रेवतीर्यद्वै देवस्य सवितुः पवित्रं या राष्ट्रात्पन्नाद् द्वयं तमस
स्परि धाता पुनातु। (22) 9

Date

Page No.

आरोहतायुर्जरसं गृणाना अनुपूर्वं यतमाना यतिष्ठ। इह
त्वष्टा सुजनिमा सुरत्नो दीर्घमायुः करतु जीवसे वः। यथाहा
न्यनुपूर्वं भवन्ति यथर्तव ऋतुभिर्यन्ति कॢप्ताः। यथा न
पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषाम्। न हि
ते अग्ने तनुवै क्रूरं चकार मर्त्यः। कपिर्बभस्ति तेजनं पुन
र्जरायुर्गौरिव। अप नः शोशुचदघमग्ने शुशुद्ध्या रयिम्।
अप नः शोशुचदघं मृत्यवे स्वाहा। अनड्वाहं मन्वारभामहे
स्वस्तये। स न इन्द्र इव देवेभ्यो वह्निस्संपारणो भव। (23)
इमे जीवा विमृतैराववर्तिन्नभूद्भद्रा देवहूतिर्नो अद्य।
प्राञ्जो गामा नृतये हसाय द्राघीय आयुः प्रतरां दधानाः।
मृत्योः पदं योपयन्तो यदैम द्राघीय आयुः प्रतरां दधानाः।
आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवथ यज्ञियासः।
इमं जीवेभ्यः परिधिं दधामि मानोनु गादपरो अर्धमेतम्।
शतं जीवन्तु शरदः पुरूची स्तिरो मृत्युं दध्महे पर्वतेन। इमा
नारीरविधवा स्सुपत्नी राञ्जनेन सर्पिषा सं मृशन्ताम्।
अनश्रवो अनमीवा स्सुरत्ना आरोहन्तु जनयो योनिमग्रे।

Date

Page No.

यदाञ्जनं त्रैककुदं जातगं हिमवतस्परि। तेनामृतस्य
मूलेनारातीर्जम्भयामसि। यथात्वमुद्भिनत्स्योषधे
पृथिव्या अधि। एवमिम उद्भिन्दन्तु कीर्त्या यशसा ब्रह्म
वर्चसेन। अजोऽस्यजास्मद्द्वेषागंसि यवोऽसि यवया
स्मद्द्वेषागंसि। (24) 10

अप नश्शोशुचदघमग्ने शुशुग्ध्या रयिम्। अप नश्शोशुचदघम्।
सुक्षेत्रिया सुगातुया वसूया च यजामहे। अप नश्शोशुचदघम्।
प्र यद्भन्दिष्ठ एषां प्रास्माकासश्च सूरयः। अप नश्शोशुचदघम्।
प्र यदग्नेस्सहस्वतो विश्वतो यन्ति सूरयः। अप नश्शोशुचदघम्।
प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयम्। अप नश्शोशुचदघम्। (25)
त्वगं हि विश्वतोमुख विश्वतः परिभूरसि। अप नश्शोशुचदघम्।
द्विषो नो विश्वतोमुखाति नावेव पारय। अप नश्शोशुचदघम्।
स नस्सिन्धुमिव नावयाति पर्षा स्वस्तये। अप नश्शोशुचदघम्।
आपः प्रवणादिव यतीरपास्मत्स्यन्दताम् अघम्। अप नश्शोशुचदघम्।
उद्रनादुदकानीवापास्मत्स्यन्दताम् अघम्। अप नश्शोशुचदघम्।

आनन्दाय प्रमोदाय पुनरागागं स्वान्गृहान्। अपनश्शोशुचदघम्।
न वै तत्र प्रमीयते गौरश्वः पुरुषः पशुः। यत्रेदं ब्रह्म
क्रियते परिधिर्जीवनाय कमपनश्शोशुचदघम्। (26)॥

अपश्याम युवतिमाचरन्तीं मृताय जीवां परिणीयमानाम्।
अन्धेन या तमसा प्रावृतासि प्राचीमवाचीमवयन्नरिष्ट्यै।
मयैतां मागंस्तां म्रियमाणा देवी सती पितृलोकं यदैषि।
विश्ववारा नभसा संव्ययन्त्युभौ नो लोकौ पयसावृणीहि।
रयिष्ठामग्निं मधुमन्तमूर्मिणमूर्जस्सन्तं त्वा पयसोपसगं सदेम।
सगंरय्या समु वर्चसा सचस्वा नस्स्वस्तये। ये जीवा ये च
मृता ये जाता ये च जन्त्याः। तेभ्यो घृतस्य धारयितुं मधुधारा
व्युन्दती। माता रुद्राणां दुहिता वसूनागं स्वसादित्यानाममृतस्य
नाभिः। प्रणुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट।
पिबतूदकं तृणान्यत्तु। ओमुत्सृजत। (27) ।2

संत्वा सिञ्चामि यजुषा प्रजामायुर्धनं च। ओं शान्तिश्शान्तिश्शान्तिः।

इति तैत्तिरीयारण्यके षष्ठः प्रश्नः